भवतीह चाष्टौ । बृहस्पतिर्भौमगृहेऽष्टमस्थः सूर्येन्दुभौमार्कजदृष्टमूर्त्तिः । अन्यैस्त्रिभिर्भार्गववृष्टिहीनो लोकान्तरं प्रापयति प्रसूतम् । वक्रो शनिर्भौमगृहं प्रयातश्छिद्रे च षष्ठे च चतुष्टये वा । कुजेन संप्राप्तबलेन दृष्टो वर्षद्वयं जीवयति प्रजातम् । सौरिस्मरस्थे यदि वा विलग्ने जन्मस्थलग्ने शशिवृश्चिके वा । सौम्येषु केन्द्रोपगतेषु सद्यो जातस्य मृत्युर्यवनोपदिष्टः । नीचस्थे देवपूज्ये तु भौमक्षेत्रगतेऽथ वा । सन्धित्रयेऽपि जातस्तु मासान्मृत्युं स गच्छति । नक्षत्रसन्धौ तिथिराशिसन्धावेकत्र तावत्प्रसवस्त्रिपक्षात् । जातस्य मृत्युं समुपैति सद्यः शुक्रेऽह्नि जीवेदिति नन्दिकोक्तम् । षष्ठ्यां जातस्यार्कलग्ने कुजे वा गण्डान्ते वा मृत्युयोगेऽथ वापि । भौमे हन्ति प्राणिनां तत्क्षणेन जीवेक्षिते चेन्न भवेत् प्रजातः । भौमोदये तद्दिवसे क्षणेन्दौ होरेश्वरे वारभूते शशाङ्के । जातः सुखी ब्रह्मपदं प्रयाति प्रसाधनाद्यैरिह मन्त्रसिद्धा । वर्गोत्तमे लग्नगते कुलीरे केन्द्रे गुरौ भूमिसुते कलत्रे । सिंहासनांशे भृगुजे विशेषाद्रसायनाद्यैरमितायुरेति । कर्मान्त्यलग्ने सबुधे कलत्रे जीवे यदा गोपुरभागयुक्ते । मृद्वंशके वा दिननाथपुत्रे जातस्त्वसंख्यायुरुपैति सूनुः । देवलोकांशके शुक्रे केन्द्रस्थे धरणीसुते । सिंहासनांशके जीवे केन्द्रे जातस्त्वसंख्यकः । उत्तमांशे भृगौ केन्द्रे शनौ पारावतांशके । स्वर्गलोके गुरौ केन्द्रे त्वौषधाधारसंख्यकः । गोपुरांशे गुरौ केन्द्रे शुक्रे पारावतांशके । त्रिकोणे कर्किलग्ने तु युगान्तं स तु जीवतिः । चापांशे कर्किलग्ने च तस्मिन् देवेन्द्रपूजिते । त्रिचतुर्भिर्ग्रहैः केन्द्रे जातो ब्रह्मपदं लभेत् । तृतीयैकादशे शुक्रे गोपुराख्यांशकान्विते । वृषे वर्गोत्तमे लग्ने ब्रह्मणः परमं पदम् । लग्ने शुक्रे गुरौ कामे कर्मगेऽमरनायके । चापमेषांशके लग्ने जातो याति परं पदम् । पञ्चमे बुधसंयुक्ते गोपुराख्यांशकान्विते । गुरौ घटे विलग्नेऽस्मिन् जातो ब्रह्मपदं लभेत् । केन्द्रे गुरौ लाभगतेऽर्कपुत्रे धने रवौ मन्दयुते कलत्रे । भाग्ये धरासूनुयुतेऽत्र जातो युगान्तकालं समसुपैति मर्त्त्यः । त्रिकोणगौ जीवबुधौ विशेषाल्लग्ने वृषे तत्र युते धराजे । निशाकरे गोपुरभागयुक्ते जातः सहस्रद्वयवर्षमेति । पक्षे सिते जन्म यदाह्नि काले केन्द्रे गुरौ वा शशिभे विलग्ने । दारे कुजे भानुसुते सुखस्थे जातस्तु जीवेद्युताब्दसंख्यम् । जीवमन्दारशुक्राणामन्योन्यं केन्द्रसंभवे । त्रिकोणे वा यदा याते जातस्त्वयुतवत्सरैः । शुभैर्युक्ते चतुष्केन्द्रे पापैः षट्त्रिभवान्वितैः । सिंहलग्ने यदा जातो जीवेत् षडयुतानि सः । कर्कादिस्थैर्ग्रहैः सर्वैर्गुरुचन्द्रादिभिर्यदा । शन्यन्तैः परमोच्चस्थैर्मुनितुल्यो भवेन्नरः । शन्यादिभौमपर्यन्ता लग्नादौ खचराः स्थिताः । वैशेषिकांशसंयुक्ता जातस्त्वमरसन्निभः । आकल्पं जीवति नरो मृगे लग्ने कुजादिकाः । रव्यन्ताः खचराः सर्वे स्वोच्चे जीवेऽह्नि जन्मनि । मेषान्त्यलग्ने सगुरौ भृगौ वा निशाकरे गोधनमध्यमांशे । सिंहासनांशे यदि वा धराजे जातस्त्वसंख्यायुरुपैति मर्त्त्यः । स्थिरे रवौ सोमसुतेन युक्ते चन्द्रे वृषस्थे मिथुने च शुक्रे । गुरौ कुलीरे यदि वा विलग्ने शनौ तुलायां मुनिसाम्यमेति । देवलोकांशके मन्दे भौमे पारावतांशके । सिंहांशके गुरौ लग्ने जातो मुनिसमो भवेत् । मेषलग्ने रवौ माने जीवे स्वोच्चसमन्विते । त्रिषडायगते पापे जातो मुनिसमो भवेत् । इति चिन्तामणौ प्रोक्ता आयुःसंख्या मनीषिणाम् यदुक्तं पूर्व्वकैः सर्व्वैस्तद्वदेव मयाऽधुना" । पारिजातांशाद्यास्तु सर्व्वा० चिन्त दर्शिताः । "मूलत्रिकोणकोणोच्चस्वर्क्षकेन्द्रोत्तमांशकाः । सप्तवर्गोद्भवाः स्वांशस्वाधिमित्रांशमित्रकाः । वर्गा इमे दश प्रोक्ताः पूर्व्वाचार्य्यैर्महर्षिभिः । वर्गद्वयादिसंयोगैः पारिजातादिसंज्ञकाः । उत्तमं तु त्रिवर्गैक्यं चतुर्वर्गं तु गोपुरम् । वर्गपञ्चकसंयोगे सिंहासनमिहोच्यते । वर्गद्वयं पारिजातं षट्कं पारावतांशकम् । सप्तकं देवलोकाख्यं स्वर्गलोकस्तथाऽष्टकम् । ऐरावतन्तु नवकं फलं तेषां पृथक् पृथक्" । जातकपद्धतौ तु रिष्टभङ्गसहितायुर्योगविशेषः गजाद्यायुःप्रमाण सहित उक्तः यथा

"लग्नसप्तमगौ पापौ चन्द्रः पापयुतो यदा । शुभग्रहै र्न दृष्टः स्यादचिरान्मृत्युकारकः । क्षीणेन्दौ व्ययगे पापैर्लग्नाष्टमनिवासिभिः । केन्द्राणि शुभहीनानि यदि क्षिप्रं तदा मृतिः । पापयुक्तः शशी लग्नसप्ताष्टद्वादशस्थितः । केन्द्रान्यस्थानगैः सौम्यैर्न दृष्टो मृत्युदायकः । पापे राश्यन्तगे सन्ध्याकाले होरा विधोर्यदा । मृत्युर्वा स्याच्चन्द्रपापैर्युते सर्व्वचतुष्टये । कर्कान्त्यगे चक्रपूर्व्वे पश्चार्द्धे पापदृग्युते । मृत्युर्वाष्टमकेन्द्रस्थैः पापैः क्षीणे विधौ तनौ । षष्ठद्वादशगैः पापैरथवा द्व्यष्टसंस्थितैः । लग्ने वा पापमध्यस्थे सप्तमे वा मृतिं व्रजेत् । चन्द्रे षष्ठेऽष्टमे वापि मरणं पापवीक्षिते । शुभैरेवेक्षिते वर्षाष्टकान्मिश्रैस्तदर्द्धतः । शुभैः षष्ठास्तगे पापैर्बलिभिः प्रविलोकिते । मासान् मृत्युः